रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

028

228 (HOF)

# 2022

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ]

[ पूर्णांक : 100

**निर्देश :** (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डा सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि न श्रृणोति। तस्माद् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् एव क्षणे मौनं धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले ज्ञानवर्धकं पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मनं रक्षेम।

(क) एक पदेन उत्तरत – 1×2=2

(i) क्रुद्धः जनः केषां हितवचनानि न श्रृणोति?

(ii) क्रोधे आगते किं धारणीयम्?

(ख) पूर्णवाक्येन उत्तरत- 1

(i) मनुष्यस्य महान् शत्रुः कः?

(ग) निर्देशानुसारम् उत्तरत - 1×2=2

(i) 'ज्ञानवर्धकम्' इति कस्य पदस्य विशेषणम्?

(ii) 'असावधानाः' इति कस्य विलोमपदम्?



[ P.T.O.

Downloaded from cclchapter.com

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

विवाहे सञ्जाते कन्याः गृहस्थाश्रमं प्रविशन्ति। यदि पुरुषो विद्वान् स्त्री च विद्याशून्या भवति तर्हि तयोः दामपत्यजीवनं सुखकरं न भवति। विद्याया अभावात् स्त्री स्वकीयं कर्त्तव्यं न जानाति, अतएव बहवः रोगाः व्याधयश्च तत्र स्थानं कुर्वन्ति। अतः स्त्रीणामपि शिक्षा पुत्राणां शिक्षावदेव आवश्यकीया वर्तते। बालिकानां शिक्षा बालकैः सहैव स्यात्, पृथग् वा, इत्येष विषयः साम्प्रतं अपि विवादास्पदमेवास्ति। स्त्रीशिक्षायाः भारते प्रथमं बहुविरोधोऽभवत्। साम्प्रतं समाप्त प्राय एव। स्त्रीशिक्षया हानयोऽपि दृश्यन्ते, तासां परिमार्जनं कर्तव्यम् । शिक्षिताः स्त्रियः प्रायोऽधिकं सुकुमार्यो भवन्ति ताः गृहकर्मसम्पादने न तथा संलग्नाः भवन्ति यथा विलासे आमोदे प्रमोदे च। एतास्त्रुटयः परिमार्जनीयाः। स्त्रीणां सा शिक्षा अद्यत्वे विशेषतो लाभप्रदा विद्यते, यया ताः गृहकर्म प्रवीणाः, कुलाङ्गनाः, प्रियवादिनी, पतिव्रताः, विदुष्यो मातरश्च भवन्तु। यया ताः देशस्य समाजस्य च कल्याण सम्पादने प्रवृत्ता भवन्तु, सैव शिक्षा हितकरी वर्तते।

(क) एक पदेन उत्तरत - 1×2=2

(i) कन्या कदा गृहस्थाश्रमं प्रविशति?

(ii) भारते प्रथमं कस्याः बहुविरोधोऽभवत्?

(ख) पूर्णवाक्येन उत्तरत - 2×2=4

(i) कस्मात् कारणात् स्त्री स्वकीयं कर्त्तव्यं न जानाति?

(ii) साम्प्रतं कः समाप्तप्राय एव?

(ग) यथानिर्देशम् उत्तरत - 1×2=2

(i) 'बहवः रोगाः' अनयोः विशेषणपदं किम्?

(ii) 'दूरीकरणम्' इति कस्य शब्दस्य अर्थः?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

## खण्ड - 'ख' (रचनात्मकं लेखनम्)

3. जन्मदिवसस्य उत्सवे मित्रं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषातः उचितानि पदानि विचित्य सम्पूरयत। 1×5=5

| **मञ्जूषा -** आगन्तव्यम्, कुशलं, जन्मदिवसः, समारोहस्य, अष्टादशतारिकायां। |
|---|

रुद्रप्रयागः

तिथि : 25-08-2021

प्रिय मित्र खीमानन्द

सप्रेम नमस्ते। अत्रः (i) ...........तत्रास्तु मित्र। शुभ समाचारः अयं यत् प्रतिवर्षम् इव मम (ii) ........नवम्बर मासस्य (iii) ........भविष्यति। अतः तुभ्यं निमन्त्रणम् अस्ति। त्वया अत्र अवश्यं (iv).......। अतः सपरिवारः आगत्य (v) ........शोभां वर्धय। मातृपितृचरणयोः मम प्रणामम् निवेदय।

भवदीयं मित्रम्

किशोरः



Downloaded from cclchapter.com

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1×5=5

**मञ्जूषा** - वर्षतौं, ह्यः, विद्यालयं, श्वः, आम्

रामः – त्व कुत्र गच्छसि?

श्यामः – अहं (i) -------- गच्छामि।

रामः – रमेशः अपि त्वया सह गमिष्यति?

श्यामः – (ii) ----------मया सह रमेशः गमिष्यति।

रामः – मयूरः कदा नृत्यति?

श्यामः – मयूरः (iii) ----------नृत्यति।

रामः – अहं यदा ग्रामं गमिष्यामि, किं त्वम् अपि गमिष्यसि?

श्यामः – न, अहम् (iv) -------- तत्र अगच्छम् ।

रामः – त्वम् आपणं कदा गमिष्यसि?

श्यामः – अहम् आपणं (v) -------- गमिष्यामि।

5. 'भारतीयः कृषकः' इति विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत।

सहायतार्थम् अधः मञ्जूषा दत्ता- 2×5=10

**मञ्जूषा -** कृषिकर्म, कृषकः, कृषिप्रधानः, कृषकानां बाहुल्यं, पशूनां, पृथिवीपुत्रः, कथ्यते, परिश्रमी, सरलः, अन्नदाता, भारतदेशस्य, प्राणाः, करोति, अस्माकं, वन्दनीयः, निर्धनः

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं / सन्धि-विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) इदं स्थानं अतीव पौ+अनम् वर्तते।

(ख) दयानन्दः यावत्+जीवनं समाजसेवामकरोत्।

(ग) हिमालयः पर्वतराजः कथ्यते।

7. रेखांकित पदेषु समासं / समास विग्रहं कृत्वा लिखत– 1×4=4

(क) चक्रपाणिः सागरे शेते।

(ख) सः मृगकाकौ पश्यति।

(ग) दिनं दिनं प्रति लता वर्धते।

(घ) त्वया विद्यायाः अभ्यासः करणीयः।



Downloaded from cclchapter.com

8. रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत- 1×5=5

(क) कार्यं धैर्येण कृ+अनीयर्।

(ख) अज+टाप् क्षेत्रे चरति।

(ग) जनकं सेव्+शानच् पुत्रः प्रसन्नः अस्ति।

(घ) वाराणस्यां धर्म+ठक् पुरुषः निवसति।

(ङ) ते एव बुद्धि+मतुप् सन्ति।

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत- 1×5=5

| **मञ्जूषाः** कदा, श्वः, मा, सम्प्रति, कदापि |
|---|

(क) ----------- मम परीक्षा भविष्यति।

(ख) सः -------- असत्यं न वदति।

(ग) त्वम् एवं ------- वद।

(घ) ----------- शीतकालो वर्तते।

(ङ) सः --------- पठति इति न ज्ञायते।

10. अधोलिखित वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3


(क) रामः पाठं पठति।

(ख) तैः गानं गीयते।

(ग) सः हसति।


11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं लिखत, नीहारिका कदा किं करोति? 1×4=4

(क)




5:00 बजे

(ख)




9:30 बजे

(ग)



4:15 बजे

(घ)



7:45 बजे

(क) नीहारिका प्रातः ------------ वादने शयनात् उत्तिष्ठति।

(ख) सा प्रातः ......... वादने विद्यालयं गच्छति।

(ग) सायंकाले .......... वादने सा विद्यालयात् गृहम् आगच्छति।

(घ) नीहारिका रात्रौ .......... वादने भोजनं करोति।



Downloaded from cclchapter.com

12. अधोलिखित वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिं संस्कृतेन कृत्वा पुनः उत्तर पुस्तिकायां लिखत– 1×2=2

(क) अस्मिन् उद्याने (88) ...........वृक्षाः सन्ति।

(ख) तेषु केवलं (71) ..........आम्रवृक्षाः सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×4=4

(क) मम गृहस्य समीपे एकः उद्यानम् अस्ति।

(ख) सः छात्रः अस्मि।

(ग) सः रमा अस्ति।

(घ) मम माता आपणं गच्छसि।

**खण्ड - 'घ' (पठित अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत -

कश्चित् कृषकः वलीवर्दाभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः वलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत्। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीबलः तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः।

(क) एकपदेन उत्तरत– 1

(i) कृषकः किं कुर्वन्नासीत्?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) कः क्षेत्रे पपात?

(ii) कृषकः कीदृशं वृषभं तोदनेन नुद्यमानः अवर्तत्?

(ग) यथानिर्देशम् उत्तरत– 1×2=2

(i) 'वलीवर्दयोः' इति पदे का विभक्तिः?

(ii) 'उत्थापयितुम्' पदे कः प्रत्ययः?



Downloaded from cclchapter.com

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः;
समान-शील-व्यसनेषु सख्यम्।।

(क) एकपदेन उत्तरत- 1

(i) सुधियः काभिः सह अनुव्रजन्ति?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) के कैः सङ्गमनुव्रजन्ति?

(ii) सख्यम् केषु भवति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) अनुसरणं कुर्वन्ति इत्यर्थे किं क्रियापदं श्लोके प्रयुक्तम्?

(ii) 'अश्वैः' इत्यस्य पर्यायपदं श्लोके किं प्रयुक्तम् ?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

व्याघ्र : – गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

श्रृगालः – व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

जम्बुकः – स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः – श्रृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

(क) एकपदेन उत्तरत- 1

(i) चपेटया प्रहरन्ती केन दृष्टा?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) गूढ प्रदेशं गन्तुं कः कं कथयति?

(ii) कः मानुषादपि विभेति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'श्रृगालः' इत्यस्य किं पर्यायपदं नाट्यांशे प्रयुक्तम्?

(ii) 'परोक्षम्' इत्यस्य किमत्रं विलोमपदम् प्रयुक्तम्?



Downloaded from cclchapter.com

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।

करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। 1×3=3

**भावार्थ :-**

वायुमण्डलम् अत्यधिकं दूषितम्। निर्मलं जलं (i) ........। खाद्यपदार्थाः अपि अखाद्याः सन्ति। धरतीतलं (ii) .......... अस्ति। अन्तर्वाह्य जगति (iii) ........... करणीयम्।

(ख) व्यायामं कुर्वतो नित्यं विरूद्धमपि भोजनम्।

विदग्धमविदग्धं वा निर्दोषं परिपच्यते।। 1×3=3

**भावार्थ :-**

ये जनाः (i) ------- कुर्वन्ति। तेषां (ii) ------ पक्वमपक्वं वा (iii) -------- पच्यते।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते।। ½×3=1½

**अन्वय :-**

फलच्छाया - समन्वितः (i) ------ सेवितव्यः।

दैवात् यदि (ii) ------ नास्ति छाया केन (iii) ------।

(ख) एक एव खगो मानी वने वसति चातकः।

पिपासितो वा म्रियते याचते वा पुरन्दरम् ।। ½×3=1½

**अन्वय :-**

एक एव मानी खगः (i) ------ वने वसति।

पिपासितः वा (ii) ------ पुरन्दरं वा (iii) -----।



Downloaded from cclchapter.com

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – 1×4=4

(क) कुशलवयोः वंशस्य कर्ता सूर्यः।

(ख) एकः वानरः आगत्य तस्य पुच्छं धुनोति।

(ग) धेनूनाम् माता सुरभिः आसीत्।

(घ) शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×8=4

(i) सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् -

(ii) सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति।

(iii) सः कृच्छ्रेण भारमुद्वहति।

(iv) भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।

(v) एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

(vi) "अयि शुभे! किमेवं रोदिषि? उच्यताम्" इति।

(vii) "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।

(viii) इतरमिव धुरं वोढुं सः न शक्नोति।

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत- 1×3=3

(क) कृशकायः

(ख) गच्छतु

(ग) प्रविश्य

*****



Downloaded from cclchapter.com